International Journal of Sanskrit Research 2020; 6(4): 133-135

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 133-135
© 2020 IJSR
www.anantaajournal.com
Received: 10-05-2020
Accepted: 12-06-2020

**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार उच्चमाध्यमिकविद्यालय:, वालिआ, याजपुरम्, ओडिशा, भारत

**Corresponding Author:**
**डॉ. जितेन्द्रकुमार दाश**
संस्कृतविभाग: अभिमन्यु सामन्तसिंहार उच्चमाध्यमिकविद्यालय:, वालिआ, याजपुरम्, ओडिशा, भारत

# संस्कृतनाटकेषु काव्ययोनय:

**डॉ. जितेन्द्रकुमार दाश**

## प्रस्तावना

संस्कृतसाहित्यवाङ्मये नाटकानां समधिकं गुरुत्वं वर्तते। नाट्यशास्त्राणां मतानुसारमेकस्य नाटकस्यानेके विभवा: सन्ति। नाटकरचनात् पूर्वं नाट्यकार: प्रप्रथमं कथावस्तुचयनं करोति। कथावस्तु सर्वथा प्रसिद्धं भवेत्। सामाजिकीकथामाधारीकृत्य नाट्यकारै: अपि नाटकानि विरचितानि। परन्तु प्रसिद्धपौराणिककथावस्तुन: आधारेण बहुनि नाटकानि रचितानि लक्ष्यन्ते। कथावस्तु चयनेऽपि कवे: प्रतिभा प्रमाणिता भवति। कथावस्तुना एव नाटकं पाठकादृतं भवति। नाट्यकथाया: अलङ्करणाय कविभि: यानि उपकरणानि गृह्यन्ते तान्येव नाट्ययोनय:।

राजशेखरेण स्वकीयकाव्यमीमांसायां द्वादशकाव्ययोनीनाम् उल्लेख: कृत:। तदनुसारं- श्रुति-स्मृतिइतिहास-पुराण-प्रमाणविद्या-समयविद्या-राजसिद्धान्तत्रयी-लोको-विरचना-प्रकीर्णं च काव्यानां द्वादशयोनय:।।१।।

अर्थात् चत्वारवेदा:, मन्वादिविरचितस्मृतिग्रन्था:, रामायणमहाभारतादि इतिहास:, पद्म-वायुविष्णु आदिनि पुराणानि, मीमांसा-न्याय-वैशषिक-वौद्धादिप्रमाणविद्या:, शैव-वैष्णवादिसमभविद्या:, अर्थशास्त्रम्,न्यायशास्त्रम् तथा कामशास्त्रमिति शास्त्रत्रयी,भिन्नभिन्नदेशानां लोका:, काल्पनिकव्यक्तीनां स्थानानां
च वर्णनम्, हस्तिशिक्षारत्नपरीक्षा-धनुर्वेद:, आयुर्वेदाद्या: कला: इति काव्ययोनय: भवन्ति।

संस्कृतनाटकेषु बहुलतया श्रुतिनामुल्लेखोऽस्ति। वैदिकवाक्यानां औपनिषदिकवाक्यानां, वैदिकोपामानां, यज्ञानां, वैदिकविधनानां, वेदसदृशविचाराणामुल्लेख: दृश्यते। तत्र मृच्छकटिके शूद्रकेण 'ऋग्वेदं सामवेदं गणितमथकला'।।२।। इति उल्लेख: कृत:। भयभूते: वेदेषु दर्शनशास्त्रेषु च वैदुष्यं सुविदितम्। भवभूतिना उत्तररामचरिते 'कामान् दुग्धे विप्रकर्षत्यलक्ष्मी'।।३।। इति यदुक्तं तत ऋग्वेदस्य निम्नोक्तऋचमनुकरोति- संक्तुमिवतितउनापुनन्तो यत्र धीरा मनसा वाचमक्रत अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मी निहिताधिवाचि।।४।। कालिदासेन मालविकाग्निमित्रे धारण्या सहागतां कौशिकां वर्णयता वेदविद्याया: उपनिषद्विद्यायाश्चोपमा प्रदत्ता।

> मङ्गलालङ्कृता भाति कौशिक्या यतिवेषया।
> त्रयी विग्रहवत्येव सममध्यात्मविद्यया।।५।।

किं च विक्रमोर्वशीय६स्य नान्दी श्लोके ''वेदान्तेषु यमाहुरेकं पुरुषमित्युपनिषदाम्, मालविका७ग्निमित्रे 'ततो ननुगायत्री विस्मरेयम्' गायत्रीमन्त्रस्य, 'अभिज्ञानशाकुन्तल'स्य८ ''सरस्वती श्रुति महतां महीयताम्'' इत्युक्तौ श्रुतीनामुल्लेख:। अश्वमेधयज्ञस्योल्लेख: भवभूते: कालिदासस्य च नाटकेषु अस्ति। मालवि९काग्निमित्रे पुष्यमित्रसम्पादिताश्वमेधयज्ञस्य तथा उत्तररामचरिते ऋष्यशृङ्गकृते यज्ञस्योल्लेख: मिलति। अपि च कालिदासेन पशुवधरूपं कृत्सितं कर्म विदधत: वेदज्ञब्राह्मणस्य दयाशीलत्वं कोमलहृदयत्वं निगदितम्।

> सहजं किल यद् विनिन्दितं न खलु तत कर्म विवर्जनीयम्।
> पशुमारणकर्मदारुणो अनुकम्पामृदुरेव श्रोत्रिय:।।१०।।

संस्कृतनाटकेषु मनु-याज्ञवलक्य-नारदादि स्मृतिकाराणां वचनानुप्राणितपात्राणां संवादा: उपलभ्यन्ते। विक्रमोर्वशीये पुरुरवस: 'संङ्गमनीय' नाम रत्नमपहरति एक: गृध्र:। तं दृष्ट्वा राजा कथयति- ''असौ गृध्र: आत्मना सह आत्मन: मरणमपहृतम्।

रत्नापहरणापराधेन स: पक्षी मृत्यु दण्डेन दण्डितो भविष्यति।''
तथा अभिज्ञानशाकुन्तले राजरक्षका: एकं मत्स्यजीविनं ताडयन्ति। मुद्रिकापहरणपराधेन स: मृत्युदण्डं लप्स्यते। तत्र जानुक: कथयति-

**गृध्रर्वलिर्भविष्यति, शुनो मुखं वा द्रक्ष्यति।।११।।**

मनुस्मृतौ१२ नारदस्मृतौ च उक्तप्रकारापराधस्य कृते मृत्युदण्डस्योल्लेख: विद्यते। किं च अभिज्ञानशाकुन्तले धनमित्रस्यानपत्यता विषये स्मारिते राजनि दृष्यन्ते स: 'इतरेषां तु वर्णानां सर्वाभावेहरेन्नृप:' इति मनुवचनमनुश्रुत्य दण्डं श्रावयति। 'उत्तररामचरिते'रामचन्द्र: मनुवचनानुसारम् अपराधिनं शम्बूकं शस्त्रेणैव मारयति। चारुदत्तेन दारिद्र्यं षष्ठमहापातकमित्युक्तम्। नाट्यकारस्य वचनमिदमनुकरोति मनो: निम्मोक्तवचनम्।
यथा-

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागम:।
महान्ति पातकान्याहु: सङ्गश्चापि तै: सह।।१३।।

किं च दृश्यते यत् नाट्यकारै: पौराणिक-ऐतिहासिक सन्दर्भाणां द्वारैव नाटकानि सज्जितानि। कालिदासेन अभिज्ञानशाकुन्तलस्य नान्दीपद्ये भगवत: शंङ्करस्य येषामष्टरूपाणां कल्पना कृता अस्ति, तेषामुल्लेख: वायुपुराणे, विष्णुपराणे, भविष्यपुराणे च मिलति। विक्रमोर्वशीये वर्णिता नारायणउर्वश्यो: कथा महाभारते, भागवते, मत्स्यपुराणे च समानरूपेण मिलति। विक्रमोर्वशीये विदूषकेन अहिल्या-इन्द्रयो: य: सम्बन्ध: उपस्थापित:, तस्याधारो भवति रामायणीया कथा। शकुन्तलायां वर्णिता ययातिशर्मिष्ठा कथा महाभारत-भागवताश्रिता एव। मुद्राराक्षसे शिविराजस्य चन्दनदासे उपमा महाभारतस्य वनपर्वाश्रिता।१४। मालविकाग्निमित्रे अंशुमानसगरयो: कथाऽपि रामायणे महाभारते चास्ति। भवभूतिकृतस्योत्तररामचरितस्य भगीरथकथा रामायणाश्रिता।१५।
प्रमाणविद्यायां समयविद्यायां च वेदान्त–मीमांसा-न्याय-वैशषिकदर्शनानि परिगणितानि भवन्ति। तत्र च शैव-वैष्णव-जैन-वौद्धसम्प्रदाया: अन्तर्भवन्ति। तत्र नाट्यकारै: कथावस्तूनां सज्जीकरणाय दर्शनसम्बन्धीयतत्वानि स्थानितानि। विविधशास्त्रेषु भट्टनारायणस्य पाण्डित्यं नि:सन्दिग्धम् तदुक्ति: 'चत्वारो वयमृत्विज:' तदीयं मीमांसाज्ञानंव्यनक्ति। तत्र नाटके वेणीसंहारे सांख्य-योग-वेदान्तादिदर्शनानाम् उल्लेख: मिलति। तथा च स्वीयं वैदुष्यं प्रमाणीकृतम्। कृष्णमिश्रेण प्रवोधचन्द्रोदये वौद्ध-जैन-कपालिक-शैवादि सम्प्रदायानामुल्लेख: कृत:। भवभूतिना उत्तररामचरिते वेदान्तस्य विवर्तवाद: दृष्टान्तद्वारैव उल्लिखित:। प्रायेण सर्वाणि संस्कृतनाटकानि राजचरिताश्रितानि। कथावस्तुनि राजचरितानामङ्कनकाले तै: अर्थशास्त्रस्य विनियोग: कृत:। कौटिलीये अर्थशास्त्रे (पूर्वभागे) राज्ञां दिनचर्या निरूपिता अस्ति। कालिदासेन अर्थशास्त्रस्य 'षष्ठे स्वैरविहारं मन्त्रं वा सेवेत' इत्युक्तिमनुकुर्वता विक्रमोर्वशीये 'षष्ठभागे त्वमपि दिवसस्यात्मन श्लन्दवती' इति लिखितम्। अभिज्ञानशाकुन्तले मृगयावर्णनम् अर्थशास्त्रस्य 'मृगयायां तु व्यायाम: श्लेष्मपित्तभेद: स्वेदनाश: चलस्थिरे च काये लक्षपरिचय:' १६ इति वचनाश्रितम्। प्रतिज्ञायौगन्धरायण नाटके महासेनेन कपटहस्तिद्वारैव उदयनस्य निग्रहणं अर्थशास्त्रस्य१७ 'हस्तिकामं वा नागवनपालहस्तिना लक्षण्येन प्रलोभयेयु:। प्रतिपन्नं गहनमेकायनं वाऽतिनीय घातयेयु:। वद्ध्वा वाऽपहरेयु:' इत्युक्त्यनुकरणे कृतमस्ति। मालविकाग्निमित्रे धारिण्या: अन्त: पुरे तिष्ठन्त्या: ''परिव्राजिकाया: परिकल्पनम् अर्थशास्त्रस्य परिव्राजिका वृत्तिकामा-दरिद्रा-विधवा-प्रगल्भा-ब्राह्मणी अन्त:पुरे कृतसंस्कारा महामात्रकुलान्यभिगच्छेत्''१८ उक्तिमनुसृत्य कृतमस्ति। मुद्राराक्षसस्य द्वितीयपद्ये राजनीते: यत् चित्रमङ्कितमस्ति तत् अर्थशास्त्रस्य षाड्गुण्यम्, उपाय:, त्रिवर्ग: इति शब्दानामाधारेण।

संस्कृतनाट्यसाहित्ये अनेकानि नाटकानि बहव: भाणाश्च वहुनि प्रहसनानि प्रणयप्रधानानि लक्ष्यन्ते। तेषु नाटकेषु मुख्यरस: शृङ्गार:। सामाजिकानां हृदि रसोद्रेकं कर्तुं नाट्यकारै: नाटकेषु वात्स्यायनोक्त शृङ्गारनखक्षत-दन्तखत-नायिका-वशीकरणादय: शब्दा: व्यवहृता:। अभिज्ञानशाकुन्तले कण्वमहर्षिण: शकुन्तलां प्रत्युपदेश: कामशास्त्रोक्तोपदेशेन सह साम्यं दधाति।

'शुश्रुषख गुरुन् कुरु प्रियसखिवृतिं सपत्नीजने-
भर्तृर्विप्रकृतापिरोषणतया मास्म प्रतीपं गम:।
भूयिष्टं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा: कुलस्याधय:'१८।।

कामसूत्रे–
'भोगोष्वनुत्सेक:''परिजने दाक्षिण्यम्''तत्प्रियाप्रियेषु स्वाप्रियाप्रियेष्विव वृत्ति:'। 'श्वश्रुश्वशुरपरिचर्या', 'धर्ममर्थं तथा कामं लभन्ते स्थानमेव च। नि: सपत्नं च भर्त्तारं नार्य: सद्वृतमाश्रिता:'।।२०।।
मालविकाग्निमित्रे नायिकानायकयो: आलिङ्गनं लतावृक्षयो: आलिङ्गनमिव दृढं भवति। तदालिङ्गनं कामसूत्रे लतावेष्टितक नाम्नाभिहितमस्ति। कामसूत्रानुसारं मूर्त्ति चित्र-पशु-शुक-सारिकादिभि: प्रेमी स्वीयं गूढभावं व्यनक्ति। विधिमिममनुश्रुत्य रत्नावल्यां नायकस्य शिशुशुकसारिकादिभि: भावाभिव्यक्तिरस्ति। तत्र एकया सारिकया रत्नावली स्वमनोगतं भावं प्रकाशयति। मालविकाग्निमित्रे प्रथममिलने नववधूमनसि उत्पन्ना: भावा: तथा अभिज्ञानशाकुन्तले दुष्यन्तशकुन्तलयो: मिलने शकुन्तलाया: हृदि जाता: कल्पना: कामसूत्राश्रिता:। मालतीमाधवस्य प्रथमाङ्के कामसूत्रोक्तनिसृष्टार्थदूत्या: योजना कृता अस्ति। तत्र कामन्दकी मालविकाग्निमित्रे एका विधवा तापसी पीठमर्दिकारूपेण नियोजिता। साधारणत: प्रेमप्रकरणे तापस्य: नियुज्यन्ते इति कामसूत्रस्य निम्नोक्त वाक्यानि सूचयन्ति।
'सखी भिक्षुकी क्षपणिकातापसीभवनेषु सुखोपाय इति गौणिकापुत्र:।२१ विधवेक्षणिकादासी भिक्षुकी शिल्पकारिकाप्रविशत्याशुविश्वासं दूतीकार्यं च विन्दति'।।२२।।
मृच्छकटिके कामसूत्रस्य वैशिकाधिकरणस्य उपयोग: कृतो दृश्यते। शुद्रक: वैशिकीविद्यायां प्रवीण आसीत्। तेन कामसूत्रकारघोटकमुखमताधारेण गणिकाकन्या वसन्तेसना नायिकारूपेण सन्निवेशिता।

**'गणिकाया दुहिता परिचारिका वाऽनन्यपूर्वा सप्तमीति घोटकमुख:'।।२३।।**

आचार्याणां मतेन कामपीडितनायकनायिकानां दश कामदशा: भवन्ति। तासु चक्षुराग-निद्रानाशकृशता-अनन्यमनसाभीष्टचिन्तनादीनामवस्थानां चित्रणं कालिदासेन शाकुन्तले विक्रमोर्वशीये च कृतम्।
तत्र कामसूत्रे-
'चक्षु: प्रीतिर्मन: सङ्ग: सङ्कल्पोत्पत्तिर्निद्राछेदस्तनुता विषयेभ्यो व्यावृत्तिर्लज्जाप्रणाश उन्मादो मूर्च्छामरणमिति तेषां लिङ्गानि'।।२४।।
किं च विविधदेशानां विदग्धजना:, स्थानानि, हस्तिशिक्षा, रत्नपरीक्षा, धनुर्वेद:, आयुर्वेद: इति कलानां वहुलोल्लेख: दृश्यते नाटकेषु। तत्र संस्कृतसाहित्ये तत् नाट्यकारणां कृते लोकज्ञानमुपयोगी भवति। मुद्राराक्षसे मृच्छकटिके च न केवलं विदग्धजनानां अपितु सामान्यजनानामपि परिचय: कृतोऽस्ति। तत्र मुद्राराक्षसे शक-यवन-किरातकाम्वोज-पारसिक-बाल्हीकादिजनानामुल्लेखोऽस्ति। मृच्छकटिके च द्युतकार-संवाहक-वन्धुल-विट-विदूषक-वौद्धभिक्षुराजसेवक-न्यायाधीश-चाण्डालादिजना: स्थानिता सन्ति। अभिज्ञानशाकुन्तले मत्स्यजीवी, प्रतिज्ञायौमन्धरायणे हस्तिशिक्षा स्वत्नवासवदत्तायां हारगुम्फनकला च नाटकानां कृते गुरुत्वपूर्णा भवन्ति।
संस्कृतनाटकानां विविधशास्त्रीयज्ञानेन सज्जीकरणाय कविभि: सर्वथा यत्न: करणीय:। कदाचित्नाटकानां गुरुत्वं वर्धयितुं तथा सहृदयानां सन्तोषाय नाट्यकारै:

उक्तविषया: स्वीकृता:। केषुचित् नाटकेषु प्रतिभां गोपयितुं शास्त्रीयतत्वानां सहायता गृहीतास्ति। अत: केषुचित् नाटकेषु नैसर्गिकता न जायते अपि तु कवीनां कृत्रिमविदग्धता प्रकाशिता भवति। भासं कालिदासं च यावत् सहृदया: विदग्धा आसन्। तदर्थं भासकाले कालिदासकाले सहृदया: अभिरूपभूयिष्टा गुणग्राहिण: इति शब्दाभ्यां सम्बोधिता:। तदवधि सहृदयानां विदग्धतां लक्षीकृत्य नाटकानि शास्त्रीयवचनै: समलङ्कृत्य कविभि: स्वीयं वैदुष्यं प्रकटीकृतम्। कविभि: नाट्यकृतिषु विविधशास्त्रीयतत्त्वानि ता स्थानितानि येनानेकानि नाटकानि अभिनेयानि न प्रतीयन्ते। अधुना चिन्तनीयं यत् किं सर्वाणि नाटकानि व्युत्पत्तिपूर्णानि ? रङ्गमञ्चदृष्ट्या किं सर्वाणि नाटकानि सफलानि ? उक्त प्रश्नद्वयस्य समाधानाय नाट्यसाहित्यस्य सिंहावलोकनमुचितम्।

अनया दृष्ट्या संस्कृतनाट्यसाहित्यस्य सिंहावलोकनेन ज्ञायते यत्-भासादेव नाट्यसाहित्यमारब्धम्। भासात् परं संस्कृतसाहित्यवाङ्मये अश्वघोष: प्रादुर्भूत:। अश्वघोषस्य पश्चादवर्तिनाट्यकार: कालिदास:। तस्मात् पूर्वं रामिल: सौमिल्लश्चेति यद्यपि कविद्वयम् आसीत् किन्तु तयो: साहित्यसृष्टि: अद्यावधि अनुपलब्धा। तत्र सुक्तिमुक्तावल्याम्-

> तौ शूद्रककथाकारौ रम्यौ रामिलसौमिल्लौ।
> काव्यं ययो द्वयोरासीदर्धनारीश्वरोपमम्।।

उक्तपद्याधारेण वक्तुं शक्यते यत्-उक्तकविद्वयेन शूद्रकनाम्ना काव्यमेकं लिखितम्। कालिदासात् परं विशाखदत्त-श्रीहर्ष-भवभूति-भट्टनारायण-राजशेखर-कृष्णमिश्रप्रमुखा: नाट्यकारा: जाता:। विशाखदत्तेन मुद्राराक्षसाद् भिन्नं 'देवीचन्द्रगुप्तम्' 'अभिसारिकावञ्चितकम्' इति नाटकद्वयं रचितं किन्तु तद्द्वयस्यास्तित्वं 'नाट्यदर्पणे' तथा शृङ्गारप्रकाशे च सुरक्षितम्। तत्परम् अष्टमशतके अनङ्गहर्षकृत 'तापसवत्सराजचरितम्' इति नाटकस्य परिचय: अभिनवगुप्तस्य टीकायामस्ति। राजशेखरेण नाटकद्वयं एका नाटिका,एकं च सट्टकं रचितानि। तस्मात् परं संस्कृतनाट्यसाहित्यस्य अपकर्ष: प्रारब्ध:।

**सहायकग्रन्था:-**


१. काव्यमीमांसा-अध्याय-८
२. मृच्छकटिकम्-१/४
३. उत्तररामचरितम्-५/३०
४. ऋग्वेद:–१०/७१/२
५. मालविकाग्निमित्रम्-१/१४
६. विक्रमोर्वशीयम्-१/१
७. मालविकाग्निमित्रम्-अङ्क-४
८. अभिज्ञानशाकुन्तलम्-६/१
९. मालविकाग्निमित्रम–अङ्क-५
१०. अभिज्ञानशाकुन्तलम्-६/१
११. अभिज्ञानशाकुन्तलम्-अङ्क-६
१२. मनुस्मृति:-९/२७०
१३. मनुस्मृति:-११/५५
१४. मुद्राराक्षसम्-१/१२५.महामभारतम्-(वनपर्व)-१३२-१३३
१५. उत्तररामचरितम्-१/२३
१६. अर्थशास्त्रम्-३७.११९
१७. अर्थशास्त्रम्-अधि-१३.अ.२
१८. अर्थशास्त्रम्-१/१२/४-५
१९. अभिज्ञानशाकुन्तलम्-४/१८
२०. कामसूत्रम्-४/१/४२
२१. कामसूत्रम्-४/५/४२
२२. कामसूत्रम्-५/४//६२
२३. कामसूत्रम्-१/५/२४
२४. कामसूत्रम्-५/५/५